श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.26- षष्ठः सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥

नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥

श्रीमद्भागवतमहापुराणम्

एकादशः स्कन्धः

॥ अथ षड्विंशोऽध्यायः ॥

श्रीभगवानुवाच

मल्लक्षणमिमं(ङ्) कायं(लँ), लब्ध्वा मद्धर्म आस्थितः।
आनन्दं(म्) परमात्मान- मात्मस्थं(म्) समुपैति माम् ॥ 1॥

गुणमय्या जीवयोन्या, विमुक्तो ज्ञाननिष्ठया।
गुणेषु मायामात्रेषु, दृश्यमानेष्ववस्तुतः।
वर्तमानोऽपि न पुमान्, युज्यतेऽवस्तुभिर्गुणैः ॥ 2॥

सं(ङ्)गं(न्) न कुर्यादसतां(म्), शिश्नोदरतृपां(ङ्) क्वचित्।
तस्यानुगस्तमस्यन्धे, पतत्यन्धानुगान्धवत् ॥ 3॥

ऐलः(स्) सम्राडिमां(ङ्) गाथा- मगायत बृहच्छ्रवाः ।
उर्वशीविरहान् मुह्यन्, निर्विण्णः(श्) शोकसं(यँ)यमे ॥ 4॥

त्यक्त्वाऽऽत्मानं(वँ) व्रजन्तीं(न्) तां(न्), नग्न उन्मत्तवन्नृपः ।
विलपन्नन्वगाज्जाये, घोरे तिष्ठेति विक्लवः ॥ 5॥

कामानतृप्तोऽनुजुषन् , क्षुल्लकान् वर्षयामिनीः ।
न वेद यान्तीर्नायान्ती- रुर्वश्याकृष्टचेतनः॥ 6॥

ऐल उवाच

अहो मे मोहविस्तारः(ख्), कामकश्मलचेतसः ।
देव्या गृहीतकण्ठस्य, नायुः(ख्) खण्डा इमे स्मृताः ॥ 7॥

नाहं(वँ) वेदाभिनिर्मुक्तः(स्), सूर्यो वाभ्युदितोऽमुया ।
मुषितो वर्षपूगानां(म्), बताहानि गतान्युत ॥ 8॥

अहो मे आत्मसम्मोहो, येनात्मा योषितां(ङ्) कृतः ।
क्रीडामृगश्चक्रवर्ती, नरदेवशिखामणिः ॥ 9॥

सपरिच्छदमात्मानं(म्), हित्वा तृणमिवेश्वरम् ।
यान्तीं(म्) स्त्रियं(ञ्) चान्वगमं(न्),नग्न उन्मत्तवद् रुदन् ॥ 10॥

कुतस्तस्यानुभावः(स्) स्यात्, तेज ईशत्वमेव वा ।
योऽन्वगच्छं(म्) स्त्रियं(यँ) यान्तीं(ङ्), खरवत्  पादताडितः ॥ 11॥

किं(वँ) विद्यया किं(न्) तपसा, किं(न्) त्यागेन श्रुतेन वा ।
किं(वँ) विविक्तेन मौनेन, स्त्रीभिर्यस्य मनो हृतम् ॥ 12॥

स्वार्थस्याकोविदं(न्) धिङ् मां(म्), मूर्खं(म्) पण्डितमानिनम् ।
योऽहमीश्वरतां(म्) प्राप्य, स्त्रीभिर्गोखरवज्जितः ॥ 13॥

सेवतो वर्षपूगान् मे, उर्वश्या अधरासवम् ।
न तृप्यत्यात्मभूः(ख्) कामो, वह्निराहुतिभिर्यथा ॥ 14॥

पुं(म्)श्चल्यापहृतं(ञ्) चित्तं(ङ्), को न्वन्यो मोचितुं(म्) प्रभुः ।
आत्मारामेश्वरमृते, भगवन्तमधोक्षजम् ॥ 15॥

बोधितस्यापि देव्या मे, सूक्तवाक्येन दुर्मतेः ।
मनोगतो महामोहो, नापयात्यजितात्मनः ॥ 16॥

किमेतया नोऽपकृतं(म्), रज्ज्वा वा सर्पचेतसः ।
रज्जुस्वरूपाविदुषो, योऽहं(यँ) यदजितेन्द्रियः ॥ 17॥

क्वायं(म्) मलीमसः(ख्) कायो, दौर्गन्ध्याद्यात्मकोऽशुचिः ।
क्व गुणाः(स्) सौमनस्याद्या, ह्यध्यासोऽविद्यया कृतः ॥ 18॥

पित्रोः(ख्) किं(म्) स्वं(न्) नु भार्यायाः(स्), स्वामिनोऽग्नेः(श्) श्वगृध्रयोः ।
किमात्मनः(ख्) किं(म्) सुहृदा- मिति यो नावसीयते ॥ 19॥

तस्मिन् कलेवरेऽमेध्ये, तुच्छनिष्ठे विषज्जते ।
अहो सुभद्रं(म्) सुनसं(म्), सुस्मितं(ञ्) च मुखं(म्) स्त्रियः ॥ 20॥

त्वङ्मां(म्)सरुधिरस्नायु- मेदोमज्जास्थिसं(म्)हतौ।
विण्मूत्रपूये रमतां(ङ्), कृमीणां(ङ्) कियदन्तरम् ॥ 21॥

अथापि नोपसज्जेत, स्त्रीषु स्त्रैणेषु चार्थवित् ।
विषयेन्द्रियसं(यँ)योगान्- मनः क्षुभ्यति नान्यथा ॥ 22॥

अदृष्टादश्रुताद् भावान्- न भाव उपजायते ।
असम्प्रयुं(ञ्)जतः(फ्) प्राणान्, शाम्यति स्तिमितं(म्) मनः ॥ 23॥

तस्मात् सं(ङ्)गो न कर्तव्यः(स्), स्त्रीषु स्त्रैणेषु चेन्द्रियैः ।
विदुषां(ञ्) चाप्यविश्रब्धः(ष्), षड्वर्गः(ख्) किमु मादृशाम् ॥ 24॥

श्रीभगवानुवाच

एवं(म्) प्रगायन् नृपदेवदेवः(स्),
स उर्वशीलोकमथो विहाय ।
आत्मानमात्मन्यवगम्य मां(वँ) वै,
उपारमज्ज्ञानविधूतमोहः ॥ 25॥

ततो दुः(स्)सं(ङ्)गमुत्सृज्य, सत्सु सज्जेत बुद्धिमान् ।
सन्त एतस्य छिन्दन्ति, मनोव्यासं(ङ्)गमुक्तिभिः॥ 26॥

सन्तोऽनपेक्षा मच्चित्ताः(फ्), प्रशान्ताः(स्) समदर्शिनः ।
निर्ममा निरहं(ङ्)कारा, निर्द्वन्द्वा निष्परिग्रहाः ॥ 27॥

तेषु नित्यं(म्) महाभाग, महाभागेषु मत्कथाः ।
सम्भवन्ति हिता नृणां(ञ्), जुषतां(म्) प्रपुनन्त्यघम् ॥ 28॥

ता ये शृण्वन्ति गायन्ति, ह्यनुमोदन्ति चादृताः ।
मत्पराः(श्) श्रद्दधानाश्च, भक्तिं(वँ) विन्दन्ति ते मयि ॥ 29॥

भक्तिं(लँ) लब्धवतः(स्) साधोः(ख्), किमन्यदवशिष्यते ।
मय्यनन्तगुणे ब्रह्मण्- यानन्दानुभवात्मनि ॥ 30॥

यथोपश्रयमाणस्य, भगवन्तं(वँ) विभावसुम् ।
शीतं(म्) भयं(न्) तमोऽप्येति, साधून् सं(म्)सेवतस्तथा॥ 31॥

निमज्ज्योन्मज्जतां(ङ्) घोरे, भवाब्धौ परमायनम् ।
सन्तो ब्रह्मविदः(श्) शान्ता, नौर्दृढेवाप्सु मज्जताम् ॥ 32॥

अन्नं(म्) हि प्राणिनां(म्) प्राण, आर्तानां(म्) शरणं(न्) त्वहम् ।
धर्मो वित्तं(न्) नृणां(म्) प्रेत्य, सन्तोऽर्वाग् बिभ्यतोऽरणम्॥ 33॥

सन्तो दिशन्ति चक्षूं(म्)षि, बहिरर्कः(स्) समुत्थितः ।
देवता बान्धवाः(स्) सन्तः(स्), सन्त आत्माहमेव च ॥ 34॥

वैतसेनस्ततोऽप्येव- मुर्वश्या लोकनिः(स्) स्पृहः ।
मुक्तसं(ङ्)गो महीमेता- मात्मारामश्चचार ह ॥ 35॥

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)
सं(म्)हितायामेकादशस्कन्धे षड्विं(म्)शोऽध्यायः ॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥

